# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ।।


## ॥ गुरूपदेशः ॥



**दशमगुरु-परमपूज्य-**
**श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः।**

वेदोक्तमेव गुरुचरणयुगलं दिव्यम् ।
यतोऽहि अस्मभ्यं सच्च गम्यञ्च मार्गं दर्शयति ।
गुरुचरणाराधना यद्यपि भवति तथाऽपि
गुरुचरणानुसरणम् अनिवार्यम् ।
श्रीचरणदर्शितमार्गः श्रीचरणमुद्रितमार्गः
गमनीयः ।



**एकादशगुरु-परमपूज्य-**
**श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।**

नित्यमनन्तं शाश्वतं तत्सान्निध्यम् ।
चैतन्यमेव । सदा साक्षि । अस्मच्छरणागत्या
तच्च प्रचेष्टितम् । हृत्कमले तदाह्वाहनेन
तदेव शक्तिरूपेण प्रादुर्भवति ।

## अध्यक्षस्य मनोगतम्

- चैतन्य गुलवाडी , मुम्बई

श्रीगुरुभ्यो नमः।। श्रीभवानीशङ्कराय नमः।। श्रीमात्रे नमः।।

एतद् वर्षम् अस्माकं कृते वैशिष्ट्यपूर्णम् अस्ति। सर्वे साधकाः नानाविधसेवाः अस्माकं पूज्यगुरुपरम्परायै समर्पयन्ति। वयं गीर्वाणप्रतिष्ठासदस्याः अपि एतां नूतनां सेवां गुरुपदारविन्दयोः अर्पयितुं सिद्धाः ।

अस्माकं दशमगुरुवर्याणां महती इच्छा आसीत् यत् एतस्याः देवभाषारूपिण्याः देवीसरस्वत्याः वरदहस्तः सर्वेषां सारस्वतजनानां शिरसि भवेत् ।

अतः एतया सेवया तां सद्यप्रसादिनीं भगवतीसरस्वतीं तथा पूज्यश्रीचरणान् सन्तोषयितुं प्रयतामहे।

" पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ "

भगवतः आश्वासनं स्मृत्वा एतत् पत्रं त्रैमासिकीगीर्वाणपत्रिकारूपेण श्रीचरणयोः समर्पयामः ।

गुरूपदेशानुवादः - अर्चना सवनाळ मुम्बई

# चिन्तनम्

- सुजाता हळदीपुर , मुम्बई

अधोनिर्दिष्टं सुभाषितम् अधिकृत्य गतसप्टेम्बरमासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने बहव: सदस्या: सहभागं गृहीतवन्त: ।

**उपदेशो गुरोर्बीजं जिज्ञासुः क्षेत्रमुच्यते ।**

**विवेकश्चाङ्कुरो बोधो द्रुमो मोक्षोऽस्तु तत्फलम् ।।**

एतस्य चिन्तनस्य सारांशः -

एतस्मिन् सुभाषिते जिज्ञासो: तुलना क्षेत्रेण सह कृता अस्ति ।

बीजवपनात् पूर्वं क्षेत्रस्य सिद्धता आवश्यकी , क्षेत्रस्य कर्षणं , पाषाणखण्डानां तथा तृणस्य निष्कासनादीनि कार्याणि आवश्यकानि । एतस्मिन् सिद्धक्षेत्रे यदा बीजवपनं भवति तदा बीजम् अङ्कुरायते ।

अधुना एतस्य अङ्कुरस्य कृमिकीटेभ्य: , खगेभ्य: च सम्यक् रक्षणम् आवश्यकं तथा तस्य वर्धनार्थं नियमितरूपेण जलसिञ्चनं , पुष्टिवर्धकरसायनै: पोषणं च आवश्यकम् । अङ्कुरस्य यदा शनै: शनै: गुल्मके परिवर्तनं भवति तदा पशुभ्य: रक्षणार्थे तं परित: मण्डलस्य रचना आवश्यकी। गुल्मकस्य रूपान्तरं यदा वृक्षे भवति तदा तस्य अन्यकारणार्थं खण्डनं न भवेत् इति दक्षता आवश्यकी अस्ति । यदा वृक्ष: फलित: भवति तदा यावत्पर्यन्तं फलं पक्कं न भवति तावत् पर्यन्तं तस्य रक्षणम् आवश्यकम् ।

तथैव मोक्षप्राप्त्यर्थे प्रथमतः जिज्ञासोः मनसः सिद्धता अत्यावश्यकी। य: आत्मन: विषये शाश्वतसत्यं ज्ञातुम् इच्छति स: जिज्ञासु:। तदेकमेव तस्य लक्ष्यम् । ज्ञानप्राप्त्यर्थं तथा सत्यान्वेषणार्थं स: प्रयासं करोति , तप: आचरति , पठनस्वाध्यायादि द्वारा मनस: दोषान् निवारयति ।

ईदृशं यदा तस्य अन्त:करणस्य सिद्धता भवति तदा गुरु: मन्त्ररूपिबीजं वपति । नियमितसाधनया एतस्य बीजस्य वर्धनं भवति । साधकस्य मनसि नित्यानित्यविवेक: अङ्कुरायते। तदा अहङ्कार-आलस्य-कामक्रोधादिषड्रिपुभ्यः तस्य रक्षणम् आवश्यकम् । शमदमतितिक्षादिरसायनैः अङ्कुरस्य पोषणं कर्तव्यम् ।

धैर्यपूर्वक-श्रद्धायुक्तसाधनया तस्य अङ्कुरस्य परिवर्तनं ज्ञानवृक्षे भवति। तदा मोहात् तस्य दुरुपयोग: न भवेत् इति दक्षता अनिवार्या । कालान्तरेण योग्यसमये साधनाया: फलप्राप्ति: भवति । किन्तु सावधानम् ! अत्र फलप्राप्त्याः अनन्तरमपि गुरुचरणयोः श्रद्धा पूर्णशरणागतिः च आवश्यक्यौ।

## लघुकथा

# तानि सप्तरूप्यकाणि...

- सुधा भट कल्याणपुर , मङ्गलूरु

भौतिकशास्त्रे नोबेल-पुरस्कारप्राप्तः श्री. सि. वि. रामन्-महोदयः सेवानिवृत्तेः पश्चात् बेङ्गलूरुनगर्याम् एकां संशोधनसंस्थां स्थापयितुम् इष्टवान् । विज्ञापनं दृष्ट्वा नैके युवकाः आगतवन्तः । तेषु पञ्च युवकाः उत्तीर्णाः अभवन् । अन्येद्युः रामन्महोदयः स्वयमेव एतेषां परीक्षणं कृत्वा त्रयाणां चयनं कृतवान् ।

तस्मिन्दिने सायङ्काले गृहं प्रति गमनार्थम् उद्युक्तः सन्  रामन्महोदयः कार्यालयात् बहिः तस्य प्रतीक्षां कुर्वन्तम् एकं युवकं दृष्टवान् ।

रामन्महोदयः मनसि चिन्तितवान् ," अयं तु प्रातःकाले परीक्षार्थम् आगतवान् आसीत् , परन्तु अस्य चयनं न अभवत् " इति । सः युवकः तस्य समीपम् आगत्य अवदत् , " महोदय ! अद्य भवतः लेखापालेन यात्राव्ययाय दत्ते धने सप्तरूप्यकाणि अधिकानि सन्ति । अहं तानि प्रतिदातुं गतवान् । परन्तु लेखापालः  " सम्प्रति लेखाविभागः पिहितः अस्ति , परिवर्तं भवतः समीप एव स्थापयतु " इति सूचितवान् । किन्तु अहं परधनं नेच्छामि । अतः भवान् एतत् धनं कृपया स्वीकरोतु " इति उक्त्वा सप्तरूप्यकाणि रामन्महोदयस्य हस्ते स्थापयित्वा सः युवकः प्रतिनिवर्तयन् आसीत् तदा एव रामन्महोदयः मनसि किमपि चिन्तयित्वा युवकम् आहूय, " भवान् श्वः आगच्छतु " इति उक्तवान् ।

रामन्महोदयेन सह पुनः मेलनं भविष्यति इति विचिन्त्य आनन्दितः सः अन्येद्युः  निश्चितसमये पुनः आगतवान् । तं दृष्ट्वा रामन्महोदयः उक्तवान् , " ह्यः भवान् भौतिकशास्त्रपरीक्षायाम् अनुत्तीर्णः जातः किन्तु भवतः शौचं , ऋजुत्वं च दृष्ट्वा अहं भवतः कृते अन्यत् एकं पदं निर्मितवान् । कार्यस्य प्रारम्भं करोतु।"

आनन्दितः सः युवकः संस्थायां कार्यं कर्तुं प्रारब्धवान् ।  युवकस्य नामधेयम् आसीत् प्रो.सुब्रमण्यन्-चन्द्रशेखरवर्यः।

गच्छता कालेन सः अपि १९८३ तमे वर्षे नोबेल-पुरस्कारं प्राप्तवान् ।

प्रो. चन्द्रशेखरमहोदयस्य जीवने परिवर्तनस्य कारणम् अभवन् तानि सप्तरूप्यकाणि !!

## सुभाषितम्

- सुजाता हळदीपुर, मुम्बई

**यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपाश्रयति ।**

**तस्य दिवाकरकिरणैः नलिनीदलमिव विकास्यते बुद्धिः ।।**

**भावार्थः -**

यथा सूर्यकिरणानां प्रभावेण कमलपुष्पाणि विकसन्ति तथैव पठतः लिखतः पश्यतः परिपृच्छतः ज्ञानिजनानाम् आश्रयं कुर्वतः जिज्ञासोः बुद्धिः प्रबुद्धा भवति।

## भावाञ्जलिः

### परमपूज्य-परिज्ञानाश्रमगुरुवर्यैः तेषां गुरून् स्वामी-आनन्दाश्रमान् प्रति प्रकटित-हृद्यात्मनिवेदनस्य केचित् अंशाः।

द्वैतं मोहाय बोधात् प्राक् जाते बोधे मनीषिणः।

भक्त्यर्थं कल्पितं द्वैतम् अद्वैतादपि सुन्दरम्।।

हे गुरो निःसन्देहं त्वं जानासि मम अन्तरङ्गम् । अपि तु तस्मिन् उद्भूतान् विचारान् समर्पयामि स्वयमेव द्वैतं कल्पयामि च । तदाकारं जातं मम चित्तं यदा मम कर्णकुहरे त्वं शक्तियुक्तं मन्त्रं मृदुस्वरेण उक्तवान् । शर्करायाः माधुर्यं ज्ञातुम् उपागतोऽहं खलु किन्तु त्वया शर्करायामेव अहं परिवर्तितः न वा । तव भक्तिरसम् आस्वादयितुम् अहं द्वैतभावम् आवाहयामि ।

तव कृपादृष्टिः सदैव मयि अस्तु । हे गुरो तव प्रेमवीक्षणे यथेष्टं निमज्जितुमिच्छामि - परिपूर्णम् आप्लावितुमिच्छामि ।

सर्वेषां कृते त्वं तु संन्यासी मठाधिपतिः गुरुवर्यः च असि किन्तु मम देव एतैः विशेषणैः अहं त्वां न सम्बोधयामि । मम कृते त्वं तु केवलं ममैव - त्वं मम स्वामी - अहं केवलं तवैव ।

तव वर्णनं कर्तुम् आरब्धवान् खलु किन्तु क्वचित् तव विराटरूपं दृष्ट्वा अवाक्कः निशब्दः च भवामि अहम् । त्वां वर्णयितुं विफलो जातोऽहम् । अहं कृष्णपरमात्मानं त्वां च पृथक् नैव भावयामि । अगाधा तव लीला हे गुरो ।

(भावार्थः - दुर्गा कुम्टा , मुम्बई)

कविता

## कार्लायां सेवा-मासः

- साधना काप्किणि , बेङ्गलूरु

कार्लायां सेवा-सप्ताहस्य अभवत् वर्धनम् ,
सेवा-मासे सञ्जातं तस्य सुन्दरपरिवर्तनम् !
फरवरीमासस्य प्रथमदिनम् आरब्धम् ,
एकमासाय कार्ला-मठः एव
अभवत् मम विशेषगृहम् !

उषःकाले उत्थानम् ,
नागालयस्य पुरतः जप-ध्यानम्
देव्याः गुरुवर्याणां च प्रथमदर्शनम् ,
" अद्य अस्माकम् अम्बा कस्य वर्णस्य
शाटिकां धारयति ? " इति चिन्तनम् !

प्रातःकाले दीप-प्रज्वालनम् ,
गीतं गीत्वा पात्राणां शोषणम् ,
ज्ञानानन्द-आश्रमे शान्त्याः सेवनम् ,
भिन्न-भिन्नपक्षिणां कूजनम् ,
वत्सेभ्यः धेनूनां वात्सल्यम् !

देव्याः पुरतः उपविश्य पठनम् ,
सुन्दरपुष्पैः गुरुवर्येभ्यः मालागुम्फनम् ,
सायङ्काले दीपाराधनार्थे अलङ्कारम् ,
अष्टावधाने मङ्गलगायने निमज्जनम् ।

भोजनसमये क्षुधितेभ्यः उदरेभ्यः परिवेषणम् ,
अत्रान्तरे प्रकृति-जनन्याः सौन्दर्यस्य आस्वादनम् ,
सेवामासः कदा समाप्तः
अस्य सम्प्रति चिन्तनम् ,
अहं प्रत्यागच्छम्... अहो आश्चर्यम् ,
मया सह आगतं मम प्रियकार्लामठस्य सारम् ।

## याज्ञवल्क्य -मैत्रेयी

- वैशाली कोप्पीकर , मुम्बई

अद्वैततत्त्वज्ञानस्य गर्भः एव मतः मैत्रेयी-याज्ञवल्क्ययोः ब्रह्मविषये विमर्शः ।

मैत्रेयी एका ब्रह्मवादिनी स्त्री । ऋग्वेदे तया रचिताः दश ऋचः अन्तर्गताः सन्ति ।

वेदकाले अपि स्त्रीणां विद्या सम्मता आसीत् ।

पुरा मिथिलायां मित्रेति ऋषिः बभूव । तस्य पुत्री मैत्रेयी । अप्रबुद्धवयसि एव तस्याः पित्रा दत्तशास्त्रविद्या सा भौतिक-जीवने अनासक्ता एव।

याज्ञवल्क्यस्य द्वे भार्ये । कात्यायनी मैत्रेयी च । तयोः मैत्रेयी एव ब्रह्मवादिनी बभूव । कात्यायनी स्त्रीप्रज्ञा एव ।

एकदा याज्ञवल्क्यः उवाच " मम सम्पत्तिं कात्यायन्यां त्वयि च विभज्य अहमस्मात् स्थानात् प्रव्रजामि " इति । अनुक्षणम् ब्रह्मनिष्ठा सा मैत्रेयी अगदत् ," यदि इयं सर्वभगा पृथिवी वित्तेन पूर्णा मम स्यात् तर्हि अहम् अमृता भवानि नु ? " इति । तदा " यथा उपकरणवतां जीवनं तथैव तव स्यात् " याज्ञवल्क्यः अभाषत । " येनाहम् अमृता न स्याम् तेनाहं किं कुर्याम् ? भगवान् यद्वेद तदेव मां ब्रूहि " इति तया उक्तम् । तदा प्रीतः याज्ञवल्क्यः , तदर्थमेव त्वं मम प्रियासि , यदि ब्रह्मज्ञानमिच्छसि तर्हि मां व्याचक्षस्व , निदिध्यासस्व च " इति अवोचत् ।

याज्ञवल्क्यः तां विविधरीत्या उपादिशत् । पत्युः कामाय ( पत्युः इच्छा अस्तीति ) पतिः प्रियः न भवति । आत्मनः कामाय पतिः प्रियो भवति । न वा जायायाः कामाय जाया प्रिया भवति प्रत्युत आत्मनः कामायैव सा प्रिया भवति । न वा पुत्राः , वित्तं , पशवः , क्षत्रम् , लोकाः , देवाः ,वेदाः , भूतानि , ब्रह्मा तेषां कामाय प्रियाः भवन्ति । न वा सर्वस्य कामाय सर्वं प्रियं भवति । आत्मनस्तु कामाय सर्वं प्रियं भवति इति वचनानि अश्रावयत् ।

" आत्मा वा अरे ! द्रष्टव्यः , श्रोतव्यः , मन्तव्यः, निदिध्यासितव्यः मैत्रेयि । आत्मनि खलु अरे ! दृष्टे, श्रुते , मते , विज्ञाते इदं सर्वं विदितम् " इति ।

## पदबन्धः

अधोदत्तपदबन्धतः 'अग्निः ' इति शब्दस्य दश समानार्थक-शब्दान् अन्विष्यन्तु ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा | ट | थी | श | चि | पू | सि | त |
| गि | अ | न | लः | त्र | पा | य | ष |
| शि | ड | फ | वि | भा | व | सुः | लं |
| खा | ढ | ब | व | नुः | कः | ण | ध |
| वा | यु | स | खः | ञै | जा | शु | चिः |
| न् | फ | ढं | ठै | हु | त | भु | क् |
| झ | वी | ति | हो | त्रः | वे | ज्ञ | त्र |
| प | य | श | ठि | ण | दाः | झ | घः |

(उत्तराणि अन्तिमपृष्ठे दत्तानि।)

## हास्यकणिका

**अधिकारी -** शिरसि किमर्थं पट्टिकाबन्धनम् ?

**कर्मचारी -** ह्यः मम पत्न्याः जन्मदिवसः आसीत् किन्तु...

**अधिकारी -** भवान् विस्मृतवान् ?

**कर्मचारी -** न , न ! अहं तु तस्याः कृते चाकलेह-मधुरपिष्टकं नीतवान् ।

**अधिकारी -** तर्हि पट्टिकाबन्धनं किमर्थम् ?

**कर्मचारी -** तस्याः नामधेयम् अस्ति **तपस्या** ।

किन्तु सः मूर्खः आपणिकः मधुरपिष्टकस्य उपरि **समस्या** इति लिखितवान् !

## बालरञ्जनी

### पञ्चतन्त्रतः

एकस्मिन् तडागे मित्रत्रयं वसति स्म । एकबुद्धिः नाम मण्डूकः , शतबुद्धिः तथा सहस्रबुद्धिः नाम द्वौ मत्स्यौ । एकदा यदा ते जले क्रीडन्तः आसन् तदा तत्र चत्वारः मत्स्यजालिकाः आगतवन्तः । एकः मत्स्यजालिकः अवदत् , " तडागे नैके मत्स्याः सन्ति । श्वः अत्र एव मत्स्यबन्धनार्थम् आगमिष्यामः । "

एतत् श्रुत्वा एकबुद्धिः उक्तवान् ," श्वः एते मत्स्यजालिकाः अस्मान् ग्रहीतुम् आगमिष्यन्ति । अधुना एव वयम् अन्यत्र गच्छामः, अस्माकं प्राणरक्षणं कुर्मः " इति ।

शतबुद्धिः उक्तवान् ," न न । अहं तु तरणे निपुणः । मत्स्यजालकैः मम ग्रहणं न शक्यम् " इति ।

सहस्रबुद्धिः उक्तवान् ," अहमपि तरणे निपुणः। जाले मम बन्धनम् अशक्यम् एव " इति ।

तदा केवलं एकबुद्धिः अन्यं तडागं गतवान् । आगामिदिने मत्स्यजालिकाः आगतवन्तः। तडागे जालं प्रसारितवन्तः । शतबुद्धिं तथा सहस्रबुद्धिं च गृहीतवन्तः , नीतवन्तः च ।

एकबुद्धिः दूरतः अश्रुपूर्णनेत्राभ्यां मित्रद्वयं दृष्टवान् ।

**नीतिपाठः -**
**अति-आत्मविश्वासः आत्मघातकः।**

## प्रहेलिका ?

- शीला कळावर , ठाणे

घण्टारवं करोमि , न अर्चकः।
धनं पृच्छामि , न याचकः।
प्रयाणं करोमि , न पथिकः।
कोऽहम् ?

(उत्तरम् अन्तिमपृष्ठे दत्तम्।)

# कालिदासः

- कृष्णानन्द मङ्कीकर , मुम्बई

**" पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठित-कालिदासः | अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव || "** इति यस्य सार्थं वर्णनं कृतमस्ति सः कालिदासः कविकुलगुरुः , कवीनां मुकुटमणिः इत्यप्यन्यविशेषणैः भूषितः अस्ति | कनिष्ठिकातः गणना आरभमानेन रसिकेन द्वितीयं कालिदासतुल्यं नाम न स्मृतम् | तस्मादेव अनामिका कराङ्गुलिः तस्याः अनामिका इति नामाभिधानं सार्थं कृतवती इत्येका स्वल्पा अतिशयोक्तिरेव , किन्तु सा उक्तिः तस्य एकमेवाद्वितीयं स्थानं दर्शयति |

**" उपमा कालिदासस्य भारवेरर्थगौरवम् | दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः || "** इति अन्येकः रसिकः माघस्य गुणवर्णनं करोति | अस्मिन् श्लोके **" उपमा कालिदासस्य "** इत्युक्तिः प्रसिद्धा | वस्तुतः कालिदासेन अनेकविधाः अलङ्काराः–शब्दालङ्कारास्तथा अर्थालङ्काराः प्रयुक्ताः सन्ति , परं तस्य उपमा-अलङ्कारस्य प्रयोजनं प्रख्यातमेव | पश्यन्तु , रघुवंशे प्रथमः श्लोकः **" वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ "** अत्र पार्वतीपरमेश्वरयोः अन्योन्यः सम्बन्धः अतीव कुशलतया दर्शितः | अथवा , अग्रिमे श्लोके **" क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः | तितीर्षुर्दुस्तरं मोहात् उडुपेनास्मि सागरम् || "** इति कथयन्कालिदासः स्वीयां मतिम् उडुपमिव (raft) कल्पयति तदा अनया उपमया अस्माकं मनश्चक्षुपुरतः सागरे उडुपोपरि स्थितः असहायः पुरुषः स्पष्टतया दृग्गोचरः भवति | कतमं शब्दलालित्यं कतमं शब्दसामर्थ्यं वा |

शकुन्तला नाटकविषये तु उक्तं **" काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला । तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।"** अत्र चतुर्थे अङ्के ४-६ : **" यास्यत्यद्य शकुन्तलेति ..."** - अस्मिन् श्लोके पितुः विकलहृदयावस्था यदा पुत्री भर्तृगृहं गच्छति , ४-९ : **" पातुं न प्रथमम्... "** - अस्मिन् श्लोके कथं पिता पुत्र्याः चरित्रविशेषं संस्मरति , ४-१७ : **" अस्मान् साधु विचिन्त्य.. "** अस्मिन् श्लोके मुनेः स्वाभिमानः तथा ४-१८ : **" शुश्रूषस्व गुरून् ... "** अस्मिन् श्लोके कन्यां प्रति उपदेशं यदा वयं पश्यामः तदा कालिदासस्य प्रतिभां , मनुष्यस्वभावस्य वर्णनचातुर्यं , शब्दसंयोजनम् इत्यादीन् दृष्ट्वा किमर्थं कालिदासस्य " कविकुलगुरुः " इति नामाभिधानं सार्थमेव इति सुज्ञातं भवति |

कालिदासस्य प्रतिभायाः आलोकनम् इत्यल्पशब्देषु कर्तुं केवलमशक्यमेव | परन्तु , संस्कृताध्ययनं तथा संस्कृतरसास्वादः कालिदाससाहित्यस्य समीचीनेन पठनेन विना असाध्यम् इत्यहं मन्ये | पठतु कालिदासम् | आस्वादयतु तस्य प्रतिभाविष्कारम् | इत्यलम् | शुभं भवतु |

## गुरुस्तवनसप्तकम्

- वृन्दा चन्दावर , मुम्बई

अद्वैतप्रकाशकं अज्ञाननाशकं वन्दे।
स्मर्तृगामिन्परिज्ञाश्रमगुरुवर्य , नोऽवतु ।।१।।

दीनबन्धुं दयासिन्धुं वन्दे।
स्मर्तृगामिन्परिज्ञाश्रमगुरुवर्य , नोऽवतु ।।२।।

सर्वरोगप्रशमनं सर्वक्लेशहरं वन्दे।
स्मर्तृगामिन्परिज्ञाश्रमगुरुवर्य , नोऽवतु ।।३।।

सर्वरक्षाकरं सर्वमङ्गलमङ्गलं वन्दे।
स्मर्तृगामिन्परिज्ञाश्रमगुरुवर्य , नोऽवतु ।।४।।

भक्तवत्सलं भक्ताभीष्टप्रदं वन्दे।
स्मर्तृगामिन्परिज्ञाश्रमगुरुवर्य , नोऽवतु ।।५।।

जन्मसंसारबन्धघ्नं जयलाभयशप्रदं वन्दे।
स्मर्तृगामिन्परिज्ञाश्रमगुरुवर्य , नोऽवतु ।।६।।

नित्यसन्तुष्टं निःश्रेयसप्रदं वन्दे।
स्मर्तृगामिन्परिज्ञाश्रमगुरुवर्य , नोऽवतु ।।७।।

## वसुधैव कुटुम्बकम्

- सङ्गीता पवार , मुम्बई

" भारत-बायोटेक " - संस्थया तथा भारतीय-वैद्यकीय-संशोधन-परिषदेन (आयसीएम्आर्) विकसितं कोविड-प्रतिबन्धक-लसं जगति ये ये इष्टवन्तः तेभ्यः सर्वेभ्यः अस्माकं भारतदेशः वितरितवान् | अस्मिन् सन्दर्भे नैकैः उक्तं यत् " भारतदेशेन कोविडप्रतिबन्धक-लसस्य निर्माणं कृत्वा प्राणघातक-कोरोनाविषाणोः जगतः परित्राणं कृतम् इति | अतः कोविडनिवारणे भारतदेशस्य अतीव महत्त्वपूर्णं योगदानम् अस्माभिः न विस्मर्तव्यम् " इति । अस्माकं देशः विंशत्योपरि देशान् इतः पूर्वं विनामूल्यं कोविड-प्रतिबन्धक-लसं प्रेषितवान् । बाङ्गलादेशः , म्यानमार , नेपाळ , भूतान , मालदीव , मॉरिशस , सेशेल्सद , श्रीलङ्का , बहरेन , ओमान , अफगाणिस्तान , बार्बाडोस , डोमिनिका इत्यादि देशेभ्यः वयं कोविड-प्रतिबन्धक-लसं दत्तवन्तः । अनेन अस्माकं देशस्य नाम जागतिक-औषधशाला इति जाता । अधुना जागतिकस्तरे बृहदौषधालय-उत्पादकदेशेषु भारतदेशः गणितः। अस्माकं पूर्वजैः सत्यमेव उक्तं '**वसुधैव कुटुम्बकम्**'।

( जालपुटतः प्राप्ता वार्ता )

### उत्तराणि

**पदबन्धः -** पावकः , अनलः , चित्रभानुः , विभावसुः , शिखावान् , जातवेदाः , वीतिहोत्रः , वायुसखः, शुचिः , हुतभुक् ।

**प्रहेलिका -** लोकयानवाहकः ।

**सम्पादनम् -** वरदा सौकूर
**पृष्ठरचना -** वन्दना बळवळ्ळी
**अन्यसहायकाः -** शीला कळावर , सुजाता हळदीपुर , दुर्गा कुम्टा , अर्चना सवनाळ , शिल्पा मुदूर , सङ्गीता पवार , अर्चना कुम्टा , तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**संस्कृताध्ययनार्थं जालाधारित-प्रबोधवर्गस्य (online classes) पञ्जीकरणार्थं सम्पर्कः -**
**Email id: prabodhah@chitrapurmath.net.in**